कुल प्रश्नों की संख्या : 19 | कुल पृष्ठों की संख्या : 08

Total No. of Questions: 19 | Total No. of Pages: 08

# हाई स्कूल परीक्षा, जून – 2018

# 512

## विषय : संस्कृत (सामान्य)

**Subject: SANSKRIT (GENERAL)**

समय : 03 घण्टात्रयम् | पूर्णाङ्का : 100

Time: 03 Hours | Maximum Marks: 100

---

*निर्देशः–*

*(i) सर्वे प्रश्नाः अनिवार्याः सन्ति।*

*(ii) प्रश्नानां सम्मुखे अङ्काः प्रदत्ता।*

प्र.1 उचित विकल्पं चित्वा लिखतः **(1×5=5)**

(क) 'स्वागतम्' इत्यस्मिन् पदे सन्धिः अस्ति–

(i) गुण स्वर सन्धिः (ii) यण स्वर सन्धिः

(iii) अयादि स्वर सन्धिः (iv) वृद्धि स्वर सन्धिः

(ख) 'दिग्गजः' इत्यस्मिन् पदे सन्धिः अस्ति–

(i) व्यञ्जन सन्धिः (ii) पूर्वरूप सन्धिः

(iii) विसर्ग सन्धिः (iv) गुण स्वर सन्धिः

(ग) 'तत्+लीनः' इत्यस्य सन्धिः अस्ति–

(i) तद्लीनः (ii) तन्लीनः

(iii) तत्लीनः (iv) तल्लीनः

(घ) 'तवल्कारः' इति पदस्य सन्धि विच्छेदः अस्ति–

(i) तव+लृकारः (ii) तव+अल्कारः

(iii) तवल्+लकारः (iv) तव+अकारः

(ङ) अधोलिखितेषु अव्ययम् नास्ति–

(i) इव (ii) अद्य

(iii) शनैः (iv) बालकः

प्र.2 उचित विकल्पं चित्वा लिखतः **(1×5=5)**

(क) 'दीनदानम्' इत्यस्मिन् पदे समासः अस्ति–

(i) द्वितीया तत्पुरुषः (ii) तृतीया तत्पुरुषः

(iii) चतुर्थी तत्पुरुष (iv) पञ्चमी तत्पुरुषः

(ख) 'हरिहरौ' इति पदस्य समास विग्रहः भवति–

(i) हरि च हरौ (ii) हरि च हरौ च

(iii) हरिश्च हरश्च (iv) हरिः हरौ च

(ग) द्विगु समासस्य उदाहरणम् नास्ति–

(i) पञ्चवटी (ii) त्रिभुवनम्

(iii) अष्टाध्यायी (iv) दशाननः

(घ) 'प्राचार्यः' इत्यस्मिन् पदे उपसर्गः अस्ति–

(i) प्रा (ii) प्र

(iii) प्राच् (iv) प्रति

(ङ) अधोलिखितेषु उपसर्गः नास्ति–

(i) प्र (ii) परा

(iii) धरा (iv) अप

प्र.3 उचित विकल्पं चित्वा लिखत– (1×5=5)

(क) 'द्रक्ष्यति' इत्यस्मिन् पदे धातुः अस्ति–

(i) दृश् (ii) द्रक्ष्

(iii) दा (iv) रक्ष्

(ख) 'पास्यति' इत्यस्मिन् पदे लकारः अस्ति–

(i) लट्लकारः (ii) लङ्लकारः

(iii) लोट्लकारः (iv) लृट्लकारः

(ग) 'अपठ्ताम्' इत्यस्मिन् पदे वचनम् अस्ति–

(i) एकवचनम् (ii) द्विवचनम्

(iii) बहुवचनम् (iv) किमपि नास्ति

(घ) 'हसामि' इत्यस्मिन् पदे पुरुषः अस्ति–

(i) प्रथमपुरुषः

(ii) मध्यमपुरुषः

(iii) उत्तमपुरुषः

(ङ) 'सदाचार एव परमोधर्मः' इत्यस्मिन् वाक्ये अव्ययम् अस्ति–

(i) सदाचारः (ii) एव

(iii) परमः (iv) धर्मः

प्र.4 उचित विकल्पं चित्वा लिखत– (1×5=5)

(क) 'पतितः' इत्यस्मिन् पदे प्रत्ययः अस्ति–

(i) क्त (ii) क्तवतु

(iii) शतृ (iv) मतुप्

(ख) 'टाप' प्रत्ययस्य उदाहरणम् अस्ति–

(i) बाला (ii) सुन्दरी

(iii) दत्वा (iv) लब्ध्वा

(ग) 'क्तवतु' प्रत्ययस्य उदाहरणम् अस्ति–

(i) त्यक्त्वा (ii) त्यक्तवान्

(iii) त्यक्तव्यम् (iv) त्यक्तः

(घ) 'कोकिला' इत्यस्मिन् पदे प्रत्ययः अस्ति–

(i) टाप् (ii) जाप्

(iii) ङ्गाप् (iv) आप्

(ङ) पठतो................................मूर्खत्वम्–

(i) भवति (ii) अस्ति

(iii) नास्ति (iv) विद्यते

प्र.5 प्रदत्त शब्दैः रिक्तस्थानानि पूरयत्– (कोऽपि पञ्च)– (1×5=5)

(श्रेष्ठः, निरोगः, मृगेन्द्राः, आत्मा, साधकं, सूर्यदेवः)

(i) सर्वेषु शरीरेषु.................................एक एव।

(ii) भारतीयैकता...................................संस्कृतम्।

(iii) ज्येष्ठः.......................................कुले लोके।

(iv) .......................................प्रकाशं प्रयच्छति।

(v) वनेषु विक्रान्ततराः........................................ ।

(vi) मनुष्य सदा........................................भवेत्।

प्र.6 अधोलिखितेषु प्रश्नेषु त्रयाणां प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एकवाक्येन लिखत– (2×3=6)

(i) देवताः कुत्र रमन्ते?

(ii) शिष्यान् कथं परीक्षेत्?

(iii) सर्वप्राचीना भाषा का अस्ति?

(iv) किं न अतिपातयेत्?

(v) कस्या अपरं नाम भागीरथी?

प्र.7 अधोलिखितेषु द्वयोः शब्दयोः शब्दरूपाणि त्रिषु वचनेषु लिखत– (2)

(i) कवि – चतुर्थी विभक्तिः।

(ii) अस्मद् – तृतीया विभक्तिः।

(iii) राम – षष्ठी विभक्तिः।

प्र.8 'कस्मात्' अथवा 'मह्यम्' इति पदस्य विभक्तिं वचनं च लिखत। (2)

प्र.9 अधोलिखितेषु गद्यांशेषु गद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत– (5×2=10)

(क) सूर्यवंशस्य राजा सगरः आसीत्। सः एकदा अश्वमेधयागं कृतवान्। यागस्य अन्ते यागस्य अश्वः यत्र तत्र सञ्चारं कृतवान्। अश्वमेधं कृत्वा सगरः स्वयम् इन्द्रः भविष्यति इति देवेन्द्रस्य असूया आसीत्। तस्मात् सः यागस्य विघ्नं कर्तुं मार्गं चिन्तितवान् ततः अश्वं गृहीत्वा पाताललोके कपिलमुनेः पुरतः स्थापितवान्। तदा मुनिः तपः कुर्वन् ध्याने आसीत्। अतः सः किमपि न ज्ञातवान्।

(i) सूर्यवंशस्य राजा कः आसीत्?

(ii) सः एकदा किं कृतवान्?

(iii) यागस्य अश्वः कुत्र सञ्चारं कृतवान्?

(iv) कः यागस्य विघ्नं कर्तुं मार्गं चिन्तितवान्?

(v) इन्द्रः अश्वं गृहीत्वा पाताललोके कस्य पुरतः स्थापितवान्?

(ख) ''सरल संस्कृतमेव भारतराष्ट्रस्य राष्ट्रभाषा भवेत''। अयमेव भावः श्रीमातुः कथनेऽपि दृश्यते सा ''संस्कृतमेवराष्ट्रभाषा भवितुम अर्हति'' इत्युक्तवती। अन्येऽपि प्रसिद्धाः नायकाः संस्कृतस्य प्रशंसां कृतवन्तः महनीयतां च स्वीकृतवन्तः। यथा–प्रथमः राष्ट्रपतिः डॉ. राजेन्द्र प्रसाद कथितवान् यत् ''संस्कृतसाहित्यं न केवलं भारतस्य कृते अपितु मानवजातेः कृते अमूल्यधनम् अस्ति''।

(i) सरल संस्कृतमेव भारतराष्ट्रस्य किं भवेत्?

(ii) ''संस्कृतमेव राष्ट्रभाषा भवितुमर्हति'' इति का उक्तवती?

(iii) प्रसिद्धाः नायकाः कस्य प्रशंसा कृतवन्तः?

(iv) भारतस्य प्रथम राष्ट्रपतिः कः आसीत्?

(v) संस्कृतसाहित्यं मानवजातेः कृते किं अस्ति?

(ग) भारते वैदिककाले उपनिषत्काले च नारी शिक्षिता आसीत्। सा न केवलम् अध्ययनम् अपितु सूक्तरचनाः अपि करोति स्म। वैदिककाले अपाला, घोषा, विश्ववारा, मैत्रेयी एतादृश्यः ब्रम्हवादिन्यः आसन्। उपनिषत्काले ता जीवनविषयकं जगद्विष्यकञ्च ज्ञानम् अधिगन्तुम् इच्छन्ति स्म। उपनिषत्काले वेदाध्ययनस्य कृते तासाम् उपनयनसंस्कारः अपि क्रियते स्म।

(i) उपनिषत्काले नारी किं–किं करोति स्म?

(ii) वैदिककाले काः ब्रम्हवादिन्यः आसन्?

(iii) उपनिषत्काले ताः किं इच्छन्ति स्म?

(iv) तासां कः संस्कारः अपि क्रियते स्म?

(v) 'ताः' इत्यस्य पदस्य विभक्तिं वचनं च लिखत।

प्र.10 अधोलिखितेषु पद्यांशेषु पद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत– **(5×2=10)**

(क) सत्येन धार्यते पृथ्वी सत्येन तपते रविः।
सत्येन वाति वायुश्च सर्वं सत्ये प्रतिष्ठितम्।।

(i) रविः केन तपते?

(ii) पृथ्वी केन धार्यते?

(iii) वायुः केन वाति?

(iv) सर्वं केन प्रतिष्ठितम्?

(v) 'धार्यते' इति पदे का धातुः अस्ति?

(ख) मत्ता गजेन्द्रा मुदिता गवेन्द्रा, वनेषु विक्रान्ततरा मृगेन्द्राः।
रम्या नगेन्द्रा निभृता नरेन्द्राः प्रक्रीडितो वारिधरैः सुरेन्द्राः।।

(i) मत्ताः के?

(ii) गवेन्द्राः कीदृशाः भवन्ति?

(iii) वनेषु विक्रान्ततराः के?

(iv) के निभ्रताः सन्ति?

(v) सुरेन्द्रः कैः सह प्रक्रीडितः?

(ग) दानेन भूतानि वशी भवन्ति दानेन वैराण्यपि यान्ति नाशम्।
परोऽपि बन्धुत्वमुपैति दानैः–दानं हि सर्वव्यसनानि हन्ति।।

(i) भूतानि केन वशीभवन्ति?

(ii) दानेन कानि नाशम् यान्ति?

(iii) दानैः कः बन्धुत्वमुपैति?

(iv) दानं कानि हन्ति?

(v) परोऽपि इति पदस्य सन्धिविच्छेदं कृत्वा सन्धि नाम लिखत।

प्र.11 युग्ममेलनं कुरुत (कोऽपि चत्वारः)– (4)

| (अ) | (ब) |
|---|---|
| (i) वाग्भूषणम् | (i) अतिपातयेत |
| (ii) मार्कण्डेय | (ii) भूषणम् |
| (iii) न कार्यकालम् | (iii) कर्त्तव्यः |
| (iv) समयस्य सदुपयोगः | (iv) वृष्टिं वर्षति |
| (v) वरूण देवः | (v) मुनिः |

प्र.12 शुद्धवाक्यानां समक्षम् ''आम'' अशुद्धवाक्यानां समक्षं ''न'' इति लिखत – (कोऽपि चत्वारः) (4)

(i) वृक्षाणां छेदनं महत् पापम्।

(ii) एकः शून्यगृहम् अनुप्रविशेत्।

(iii) सगरस्य पुत्राः भस्मीभूताः जाताः।

(iv) सूर्यदेवः वृष्टिं वर्षति।

(v) धनेन अमृतत्वं प्राप्यते।

प्र.13 अधोलिखितेषु प्रश्नेषु चतुर्णां प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एकपदेन लिखत– (4)

(i) 'बुन्देलकेसरी' इति नाम्ना कः प्रसिद्धः?

(ii) भारतस्य प्रथमप्रधानमंत्री कः आसीत्?

(iii) वरतन्तु शिष्यः कः आसीत्?

(iv) सर्वस्य जलस्य आधारः कः?

(v) मनः जाग्रतः कुत्र उदैति?

प्र.14 प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्ययपुस्तकस्य सुभाषितद्वयं लिखत। (4)

प्र.15 स्वप्राचार्यस्य कृते अवकाशार्थम् एकं प्रार्थनापत्रं संस्कृते लिखत। (4)

<u>अथवा</u>

स्वस्य मित्रस्य कृते अध्ययनं वर्णयन् एकं पत्रं संस्कृते लिखत।

प्र.16 अधोलिखितेषु पञ्च अशुद्धकारक वाक्यानां शुद्धि करणीया – (5)

(i) मम दुग्धं रोचते।

(ii) वृक्षस्य पत्रम् पतति।

(iii) श्री गुरुं नमः।

(iv) त्वम् नाम किम्?

(v) जलस्य विना जीवनं नास्ति।

(vi) गङ्गा हिमालये प्रभवति।

प्र.17 अधोलिखित वाक्यानां कथानुसारेण क्रमसंयोजनं कुरुत– (5)

(i) ग्रामे एकः प्राचीनः विशालः न्यग्रोधवृक्षः आसीत्।

(ii) इदं मदीयः वृक्षः इति काकस्य ध्वनिः अन्तरिक्षम् अस्पृशत्।

(iii) तस्य शाखायाम् एकः काकः वसन्नासीत्।

(iv) अहम् अस्मिन् चिरात् वसामि।

(v) हे बन्धवः श्रूयतां मे वचः।

प्र.18 अधोलिखितं अपठितं गद्यांशं सम्यक् पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – (5)

स्वस्थशरीरे एव स्वस्थाबुद्धिः वसति। स्वस्था बुद्धि एव स्वस्थविचाराणां जननी अस्ति। व्यायामशीलः मनुष्यः एव नीरोगः चिरंजीवी च भवति। व्यायामशीलाः मनुष्याः प्रायेण रुग्णाः न भवन्ति। विविध रोगाणां चिकित्सा अपि व्यायामेन सम्भवति। अतः जीवनस्य कृते व्यायामः परमावश्यकः।

(i) उपर्युक्त गद्यांशस्य उचित शीर्षकं लिखत।

(ii) स्वस्था बुद्धि कुत्र वसति?

(iii) का स्वस्थविचाराणां जननी अस्ति?

(iv) कः एवं नीरोगः?

(v) विविध रोगाणां चिकित्सा केन सम्भवति?

प्र.19 अधोलिखितेषु एकं विषयं स्वीकृत्य शतशब्देषु संस्कृतभाषायां निबन्धं लिखत – (10)

(i) संस्कृतभाषाया महत्वम्

(ii) उत्सवः (दीपावलिः)

(iii) अनुशासनम्

(iv) मम् दिनचर्या

------------------------------